# नलोपाख्यानम्

## 11

बृहदश्व उवाच।

अपक्रान्ते नले राजन्दमयन्ती गतक्लमा।

अबुध्यत वरारोहा संत्रस्ता विजने वने॥ ३-६०-१ ॥

सापश्यमाना भर्तारं दुःखशोकसमन्विता।

प्राक्रोशदुच्चैः संत्रस्ता महाराजेति नैषधम्॥ ३-६०-२ ॥

हा नाथ हा महाराज हा स्वामिन्किं जहासि माम्।

हा हतास्मि विनष्टास्मि भीतास्मि विजने वने॥ ३-६०-३ ॥

ननु नाम महाराज धर्मज्ञः सत्यवागसि।

कथमुक्त्वा तथासत्यं सुप्तामुत्सृज्य मां गतः॥ ३-६०-४ ॥

कथमुत्सृज्य गन्तासि वश्यां भार्यामनुव्रताम्।

विशेषतो ऽनपकृते परेणापकृते सति॥ ३-६०-५ ॥

शक्ष्यसे ता गिरः सत्याः कर्तुं मयि नरेश्वर।

यास्त्वया लोकपालानां संनिधौ कथिताः पुरा॥ ३-६०-६ ॥

पर्याप्तः परिहासो ऽयमेतावान्पुरुषर्षभ।

भीताहमस्मि दुर्धर्ष दर्शयात्मानमीश्वर॥ ३-६०-७ ॥

दृश्यसे दृश्यसे राजन्नेष तिष्ठसि नैषध।

आवार्य गुल्मैरात्मानं किं मां न प्रतिभाषसे॥ ३-६०-८ ॥

नृशंसं बत राजेन्द्र यन्मामेवंगतामिह।

विलपन्तीं समालिङ्ग्य नाश्वासयसि पार्थिव॥ ३-६०-९ ॥

न शोचाम्यहमात्मानं न चान्यदपि किंचन।

कथं नु भवितास्येक इति त्वां नृप शोचिमि॥ ३-६०-१० ॥

कथं नु राजंस्तृषितः क्षुधितः श्रमकर्शितः।

सायाह्ने वृक्षमूलेषु मामपश्यन्भविष्यसि॥ ३-६०-११ ॥

ततः सा तीव्रशोकार्ता प्रदीप्तेव च मन्युना।

इतश्चेतश्च रुदती पर्यधावत दुःखिता॥ ३-६०-१२ ॥

मुहुरुत्पतते बाला मुहुः पतति विह्वला।

मुहुरालीयते भीता मुहुः क्रोशति रोदिति॥ ३-६०-१३ ॥

सा तीव्रशोकसंतप्ता मुहुर्निःश्वस्य विह्वला।

उवाच भैमी निष्क्रम्य रोदमाना पतिव्रता॥ ३-६०-१४॥

यस्याभिशापाद्दुःखार्तो दुःखं विन्दति नैषधः।

तस्य भूतस्य तद्दुःखाद्दुःखमभ्यधिकं भवेत्॥ ३-६०-१५॥

अपापचेतसं पापो य एवं कृतवान्नलम्।

तस्माद्दुःखतरं प्राप्य जीवत्वसुखजीविकाम्॥ ३-६०-१६॥

एवं तु विलपन्ती सा राज्ञो भार्या महात्मनः।

अन्वेषति स्म भर्तारं वने श्वापदसेविते॥ ३-६०-१७॥

उन्मत्तवद्भीमसुता विलपन्ती ततस्ततः।

हा हा राजन्निति मुहुरितश्चेतश्च धावति॥ ३-६०-१८॥

तां शुष्यमाणामत्यर्थं कुररीमिव वाशतीम्।

करुणं बहु शोचन्तीं विलपन्तीं मुहुर्मुहुः॥ ३-६०-१९॥

सहसाभ्यागतां भैमीमभ्याशपरिवर्तिनीम्।

जग्राहाजगरो ग्राहो महाकायः क्षुधान्वितः॥ ३-६०-२०॥

सा ग्रस्यमाना ग्राहेण शोकेन च पराजिता।

नात्मानं शोचति तथा यथा शोचति नैषधम्॥ ३-६०-२१॥

हा नाथ मामिह वने ग्रस्यमानामनाथवत्।

ग्राहेणानेन विपिने किमर्थं नाभिधावसि॥ ३-६०-२२॥

कथं भविष्यसि पुनर्मामनुस्मृत्य नैषध।

पापान्मुक्तः पुनर्लब्ध्वा बुद्धिं चेतो धनानि च॥ ३-६०-२३॥

श्रान्तस्य ते क्षुधार्तस्य परिग्लानस्य नैषध।

कः श्रमं राजशार्दूल नाशयिष्यति मानद॥ ३-६०-२४॥

तामकस्मान्मृगव्याधो विचरन्गहने वने।

आक्रन्दतीमुपश्रुत्य जवेनाभिससार ह॥ ३-६०-२५॥

तां स दृष्ट्वा तथा ग्रस्तामुरगेणायतेक्षणाम्।

त्वरमाणो मृगव्याधः समभिक्रम्य वेगितः॥ ३-६०-२६॥

मुखतः पातयामास शस्त्रेण निशितेन ह।

निर्विचेष्टं भुजंगं तं विशस्य मृगजीवनः॥ ३-६०-२७॥

मोक्षयित्वा च तां व्याधः प्रक्षाल्य सलिलेन च।

समाश्वास्य कृताहारामथ पप्रच्छ भारत॥ ३-६०-२८॥

कस्य त्वं मृगशावाक्षि कथं चाभ्यागता वनम्।

कथं चेदं महत्कृच्छ्रं प्राप्तवत्यसि भामिनि॥ ३-६०-२९॥

दमयन्ती तथा तेन पृच्छ्यमाना विशां पते।

सर्वमेतद्यथावृत्तमाचचक्षे ऽस्य भारत॥ ३-६०-३०॥

तामर्धवस्त्रसंवीतां पीनश्रोणिपयोधराम्।

सुकुमारानवद्याङ्गीं पूर्णचन्द्रनिभाननाम्॥ ३-६०-३१॥

अरालपक्ष्मनयनां तथा मधुरभाषिणीम्।

लक्षयित्वा मृगव्याधः कामस्य वशमेयिवान्॥ ३-६०-३२॥

तामथ श्लक्ष्णया वाचा लुब्धको मृदुपुर्वया।

सान्त्वयामास कामार्तस्तदबुध्यत भामिनी॥ ३-६०-३३॥

दमयन्ती तु तं दुष्टमुपलभ्य पतिव्रता।

तीव्ररोषसमाविष्टा प्रजज्वालेव मन्युना॥ ३-६०-३४॥

स तु पापमतिः क्षुद्रः प्रधर्षयितुमातुरः।

दुर्धर्षां तर्कयामास दीप्तामग्निशिखामिव॥ ३-६०-३५॥

दमयन्ती तु दुःखार्ता पतिराज्यविनाकृता।

अतीतवाक्पथे काले शशापैनं रुषा किल॥ ३-६०-३६॥

यथाहं नैषधादन्यं मनसापि न चिन्तये।

तथायं पततां क्षुद्रः परासुर्मृगजीवनः॥ ३-६०-३७॥

उक्तमात्रे तु वचने तया स मृगजीवनः।

व्यसुः पपात मेदिन्यामग्निदग्ध इव द्रुमः॥ ३-६०-३८॥